śrīgaṇeśāya namaḥ

**prahlāda stutiḥ**

manye dhanābhijanarūpatapaḥśrutaujastejaḥprabhāvabalapauruṣabuddhiyogāḥ |
nārādhanāya hi bhavanti parasya puṁso bhaktyā tutoṣa bhagavāngajayūthapāya || 9 ||

naivātmanaḥ prabhurayaṁ nijalābhapūrṇo mānaṁ janādaviduṣaḥ karuṇo vṛṇīte
ya dyajjano bhagavate vidadhīta mānaṁ taccātmane pratimukhasya yathā mukhaśrīḥ || 11 ||

nāhaṁ bibhemyajita te'tibhayānakāsya jihvārkanetrabhrukuṭīrabhasogradaṁṣṭrāt | 15 ||
trasto'smyahaṁ kṛpaṇavatsala duḥsahogra saṁsāracakrakadanādgrasatāṁ praṇītaḥ |
baddhaḥ svakarmabhiruśattama te'ṅghrimūlaṁ prīto'pavargaśaraṇaṁ hvayase kadā nu || 16 ||

so'haṁ priyasya suhṛdaḥ paradevatāyā līlākathāstava nṛsiṁha viriñcagītāḥ |
añjastitarmyanugṛṇanguṇavipramukto durgāṇi te padayugālayahaṁsasaṅgaḥ || 18 ||

yasminyato yarhi yena ca yasya yasmād yasmai yathā yaduta yastvaparaḥ paro vā |
bhāvaḥ karoti vikaroti pṛthaksvabhāvaḥ sañcoditastadakhilaṁ bhavataḥ svarūpam || 20 ||

māyā manaḥ sṛjati karmamayaṁ balīyaḥ kālena coditaguṇānumatena puṁsaḥ |
chandomayaṁ yadajayārpitaṣoḍaśāraṁ saṁsāracakramaja ko'titarettvadanyaḥ ||

tasmādamūstanubhṛtāmahamāśiṣo'jña āyuḥ śriyaṁ vibhavamaindriyamāviriñcāt |
necchāmi te vilulitānuruvikrameṇa kālātmanopanaya māṁ nijabhṛtyapārśvam ||

kutrāśiṣaḥ śrutisukhā mṛgatṛṣṇirūpāḥ kvedaṁ kalevaramaśeṣarujāṁ virohaḥ |
nirvidyate na tu jano yadapīti vidvān kāmānalaṁ madhulavaiḥ śamayandurāpaiḥ ||

naitanmanastava kathāsu vikuṇṭhanātha samprīyate duritaduṣṭamasādhu tīvram |
kāmāturaṁ harṣaśokabhayaiṣaṇārtaṁ tasminkathaṁ tava gatiṁ vimṛśāmi dīnaḥ ||

jihvaikato'cyuta vikarṣati mā'vitṛptā śiśno'nyatastvagudaraṁ śravaṇaṁ kutaścit |
ghrāṇo'nyataścapaladṛkkva ca karmaśaktirbahvyaḥ sapatnya iva gehapatiṁ lunanti ||

maunavrataśrutatapo'dhyayanasvadharma vyākhyārahojapasamādhaya āpavargyāḥ |
prāyaḥ paraṁ puruṣa te tvajitendriyāṇāṁ vārtā bhavantyuta na vātra tu dāmbhikānām ||

tvaṁ vāyuragniravanirviyadambu mātrāḥ prāṇendriyāṇi hṛdayaṁ cidanugrahaśca |
sarvaṁ tvameva saguṇo viguṇaśca bhūman nānyattvadastyapi manovacasā niruktam ||

~~naite guṇā na guṇino mahadādayo ye sarve manaḥ prabhṛtayaḥ sahadevamartyāḥ |~~
ādyantavanta urugāya vidanti hi tvāmevaṁ vimṛśya sudhiyo viramanti śabdāt ||

śrīmadbhāgavata-mahāpurāṇe saptamaskandhe prahlādacarite bhagavatstavo nāma
navamodhyāyaḥ

श्रीगणेशाय नमः

**प्रह्लाद स्तुतिः**

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय॥ ९ ॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते।
य यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः॥ ११ ॥
नाहं बिभेम्यजित तेऽतिभयानकास्य जिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात्। १५ ॥
त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्र संसारचक्रकदनाद्ग्रसतां प्रणीतः।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु॥ १६ ॥
सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिञ्चगीताः।
अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः॥ १८ ॥
यस्मिन्यतो यर्हि येन च यस्य यस्माद् यस्मै यथा यदुत यस्त्वपरः परो वा।
भावः करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम्॥ २० ॥
माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः।
छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः॥
तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्चात्।
नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वम्॥
कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः।
निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन्दुरापैः॥
नैतन्मनस्तव कथासु विकुण्ठनाथ सम्प्रीयते दुरितदुष्टमसाधु तीव्रम्।
कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः॥
जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्।
घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्म व्याख्यारहोजपसमाधय आपवर्ग्याः।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम्॥

---

त्वं वायुरग्निरवनिर्वियदम्बु मात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च।
सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तम्॥
नैते गुणा न गुणिनो महदादयो ये सर्वे मनः प्रभृतयः सहदेवमर्त्याः।
आद्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥
श्रीमद्भागवत-महापुराणे सप्तमस्कन्धे प्रह्लादचरिते भगवत्स्तवो नाम नवमोध्यायः